संस्कृत.　　क्र.नं १०　　~~स्मार्त~~.

याज्ञिक

# महेशभट्टीय प्रयोग.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

← २३१८

(1)

महेश्वरभट्टीमत्रयोगः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

२

हि.स. १

श्रीगणेशाय नमः ॥ प्रणम्य गोपालमनंतमाद्यं नेत्रांचलानंदितगोपवृंदं ॥ स्मार्तप्रिये गंगविद्भालिथ
त्थाह्रियत्र्यंबकेश्रीमविधौ महेशः ॥१॥ सत्याषाढं मुनिं वंदे स्वर्णकेशसमन्वितं ॥ येनानुष्ठेयपदार्थानां क्रमतः
लोकस्य यत्न ॥२॥ मत्कृतो वेदवृत्तिमार्गमते विपश्चितः ॥ मालदेव श्रीप्रजीयाश्च सिवेणीलत्वा विलस
अथ संस्काराणां प्रतिज्ञातस्य प्रकरणत्रयेण हिरण्यकेशिसूत्रस्मार्तकर्मणां प्रयोगोऽभिधीयते ॥ तत्रादौ सं
स्कारप्रकरणे गर्भाधानादयः संस्काराः ॥ द्वितीये शांतिप्रकरणे वास्तुशमनादयः शांतयः ॥ तृतीये
प्रकरणे मासश्राद्धादिश्राद्धान्युच्यंते अथ संस्कारप्रकरणं तत्र प्रथमं षोडश कर्मणां प्रयोग उच्य
ते गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकर्मान्नप्राशनचौलोपनयनवेदव्रतचतुष्टयगो
नसमावर्तनविवाहपितृमेधाख्यानि तत्र संस्कारेषु गर्भाधानसंस्कारस्य प्राथम्यादनुष्ठानं लोके
न सोमंत्रं क्रममुत्सृज्य गर्भाधानादिक्रमेण संस्काराणां प्रयोग उच्यते पंचदशानां ॥ पितृमेधप्रयोगः
श्राद्धप्रकरणे वक्ष्यते ॥ गर्भाधानादिचौलांतसंस्काराणां कालातिक्रमे सति अग्नौ प्रायश्चित्तेनाभि सं.व.
चरितार्थत्वं ॥ उपनयनप्रभृतिसंस्काराणां तु कालातिक्रमे सति तत्कालातिक्रमप्रायश्चित्तं कृत्वा १

Rajawade Sanshodhan Mandal, Dhule and ... Vishwakalyan ...

24

उपनयनादयः संस्कारास्त्ववश्यं कर्तव्या इत्यभिप्रायेणोपनयनमुखेनैव संस्काराणामाम्नानं कृतं सूत्रे
कृता॥ तथा चोपनयनमारभ्य गौतमसूत्रे नेत्रे हरदत्तभाष्यकृतो व्याख्या॥ अगतो गर्भाधानादिसंस्कारलो
पमापश्चिनं कृत्वाप्युपनयनं भवति॥ उपनयनं विनाम द्विचरे संस्कारा न भवंति इत्यभिप्रायेणोपनयन
मुखेन सूत्रितमाचार्येणेति॥ अथ गर्भाधानप्रयोगः॥ रजोदर्शने सति स्त्री त्रिरात्रं स्नानेनेत्राभ्यंजनं
कुंकुमादिनाशिरसि तैलेश्चनं कज्जलादिनाक्षुरंजनं दंतधावनं नखनिकृंतनं रज्जुकरणं मंजनस्यादिना
जलपानमित्येवमादीनि न कुर्यात्॥ रजोदर्शनात् षोडशदिनानि ऋतुस्तन्मध्ये आद्यदात्रित्रयं चतुष्टयं का
संक्रांत्यमावास्याष्टम्याद्युपाम्लादि कं च विहाय दंपत्योश्चंद्रायानुकूल्ये चतुर्थे विहिते त्वाद्य तुर्थादि
युग्मदिवसे विषमे वेत्संवसेनेत्समाद्यो गर्भाधानं कार्यं॥ कर्ता सुस्नातः कृतमांगलिकः स्वलंकृतः वस्त्रा
च्छादिते पीठे प्राङ्मुख उपविश्य स्नातां स्वच्छवस्त्रकृतपरिधानां भूषणमाल्यानुलेपनैरलंकृतां प्रथमं शिष्ट
श्रीलक्ष्मण कृतसंभाषां भार्यां स्वदक्षिणात उपवेश्य आचम्य प्राणानायम्य॥ सुमुखश्चैकदंतश्च कपिलो गजक
र्णकः॥ लंबोदरश्च विकटो विघ्नराजो गणाधिपः॥ धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः॥ द्वादशैता

3

२ ह॰प्र॰ २

नि नामान्नियः पठेच्छृणुयादपि ॥ विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ॥ संग्रामे संकटे चैव विघ्नस्तस्य न जा
यते ॥ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजं ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ अभीप्सि० ॥ इत्यादिमंग
लश्लोकान्पठित्वा ॥ ॐ वाणीकमलासनाभ्यां नमः ॥ लक्ष्मीनारायणाभ्यां नमः ॥ उमामहेश्वराभ्यां नमः ॥ शचीपुरंदरा
भ्यां नमः ॥ मातापितृभ्यां नमः ॥ इष्टदेवताभ्यो० ॥ कुलदेवताभ्यो० ॥ वास्तुदेवता ग्रामदेवताभ्यो० ॥ सर्वेभ्यो ब्राह्मणे
भ्यो नमः ॥ ॐ विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोरचिंत्यामितवीर्यस्य शक्त्या ध्रियमाणस्य ब्रह्मांडखंडोदरम
ध्ये भूमंडले जंबूद्वीपे भारतवर्षे आर्यावर्ते दंडकारण्ये गोदावर्या दक्षिणे देशे इंदुपालनगरश्रुतमक्षेत्रे ॥ अविमुक्ते
वाराणस्यां आनंदवने गौरीमुखे त्रिकंटकविराजिते कुमारिकाक्षेत्रे भागीरथ्याः पश्चिमे तीरे अद्य ब्रह्मणो द्वि
तीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वंतरे अष्टाविंशतियुगचतुष्कांतिमे कलियुगे प्रथमचरणे बौद्धाव
तारे विक्रमशके अमुकनाम्नि संवत्सरे अयने ऋतौ मासे पक्षे तिथौ ॥ नक्षत्रे योगे करणे सूर्ये चंद्रे देवगुरौ शेषेषु ग्रहेषु
यथायथास्थानस्थितेषु सत्सु एवंगुणविशेषणविशिष्टायां पुण्यतिथौ शुभतिथौ वेति पाठे न विविक्तो देशकालौ सं
कीर्त्य मम अस्यां भार्यायां प्रतिगर्भसंस्कारातिशयद्वारा अस्यां जनिष्यमाणगर्भाणां बीजगर्भसमुद्भवैनोनिबर्हणद्वारा
श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं कर्म करिष्ये ॥ तदंगं गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं

सांस्कृ २

३B

र्व कर्मसिध्यै ॥ इति संकल्प्य गणपतिं पूजयेत् ॥ अथ सर्वमंगलादौ सर्वत्र पठेत् ॥ प्रातिभादौ ॥ ओं गणानां त्वा गण
पतिं हवामहे कविं कवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद
सादनं ॥ ॐ इति मंत्रेण गणपतये नमः इति नाममंत्रेण वा आवाहनासनपाद्यार्घ्याचमनस्नानवस्त्रगंधपुष्पधूप
दीपनैवेद्यफलतांबूलदक्षिणानमस्काराः इति षोडशोपचाराः ॥ गंधपुष्पधूपदीपनैवेद्यादिपंचोपचारैर्वा गण
पतिं संपूज्य पुष्पांजलिं दत्वा ॥ वक्रतुंड महाकाय सूर्यकोटिसमप्रभ ॥ निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
इति प्रार्थयेत् ॥ इति गणपतिपूजा ॥ अथ पुण्याहवाचनप्रयोगः ॥ तत्र गर्भाधानादिसर्वकर्मस्वादावंते च केषुचित्पु
ण्याहवाचनं विहितं ॥ ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्तिमृद्धिमिति वाचयित्वोक्तादिना सूत्रं कृता ॥
तत्र देवताकांक्षायां शास्त्रांतरोक्ता देवता उच्यंते ॥ गर्भाधानस्यादावंते च ब्रह्मा ॥ पुंसवनस्योभयत्र प्रजापतिः ॥ सी
मंतस्योभयत्र धाता ॥ जातकर्मण्युभयत्र मृत्युः ॥ नामकरणस्यादौ सविता ॥ अंते प्रजापतिः ॥ आसूर्यभूपनस्योभ
यत्राग्निरापूष्णानू ॥ अन्नप्राशनस्योभयत्र सविता ॥ चौलस्यादौ केशिनः ॥ अंते प्रजापतिः ॥ उपनयनस्यादाविंद्रः ॥
अंते श्रद्धामेधे ॥ उपनयनस्याचतुर्थदिवसीयपुण्याहवाचने सुश्रवाः ॥ पुनरुपनयनस्योभयत्राग्निः ॥ ब्रह्मचा
री व्रतोपाकरणविसर्गयोरुभयत्र सविता ॥ वेदोपाकरणविसर्गयोरुभयत्र सविता ॥ ब्रह्मचारिव्रतलोपप्रायश्चित्त

५

हि॰ प्र॰ ३

स्योभयत्र सविता ॥ समावर्तनस्योभयत्र श्रीरिंद्रो वा ॥ विवाहस्योभयत्राग्निः ॥ औपासनोपक्रमे त्वाग्नि
सूर्यप्रजापतयः ॥ दर्शपूर्णमासस्थालीपाकयोरुभयत्राग्निः ॥ वास्तुहोमस्यादौ वास्तोष्पतिरंते प्रजापतिः ॥
शूलगवस्योभयत्रेशानः ॥ प्रदोषव्रतस्योभयत्रेशानः ॥ नक्षत्रहोमस्योभयत्र नक्षत्रदेवताः ॥ आग्रयणस्योभयत्रा
ग्रयणदेवताः ॥ प्रत्येकं नवग्रहमखेऽभयत्र क्रमेणादित्यादयो नव ग्रहाः ॥ तंत्रेण ग्रहमखे अर्कादयश्चोभयत्र ॥ कू
ष्मांडहोमे चांद्रायणे चोभयत्राग्न्यादयः ॥ सर्पबलेरुभयत्र सर्पाः ॥ नक्षत्रेष्टावुभयत्र नक्षत्रदेवताः ॥ तडागाद्यु
त्सर्गेऽभयत्र वरुणः ॥ एकोद्दिष्टस्योभयत्र प्रजापतिः ॥ सूतकांते प्रभामा ॥ अग्न्याधेयेऽभयत्राग्न्यादयः ॥ अग्नि
होमेऽभयत्रेंद्रः ॥ अनादिष्टकर्मसु सर्वत्र प्रजापतिः ॥ अयं विप्रकृतप्रकरणे कासांचिद्देवतानामुपयोगः ॥ तथापि
प्रकरणांतरेऽपि कासांचिदुपयोगो भविष्यति ॥ प्रसंगात्सर्वाणि रूपिता इत्येव धेयं ॥ इति बौधायनोक्ताः ॥ पुण्याहदेव
कर्मा ब्राह्मणानन्नादिना संतर्प्य गंधादिना संपूज्य तान् पुण्याहं वाचयेत् ॥ ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां ॥
पिपृतान्नो भरीमभिः ॥ मंत्रार्थस्तु उदगपवर्गे देवे मंगलानि दक्षिणोत्तरे तो भूमिं स्पृष्ट्वा ॥ ॐ ओषधयः संवदंते सो
मेन सह राज्ञा ॥ यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि ॥ दक्षिणोत्तरतः संतुल पुंजौ कृत्वा ॥ आ कलशेषु धाव
ति पवित्रे परिषिच्यते ॥ उक्थैर्यज्ञेषु वर्धते ॥ आजिघ्र कलशं मह्युरुधारा पयस्वसा त्वा विशंत्विंदवः समुद्रमिव सा॰ बु॰ ३

4A

सिंधवः सामा सहस्त्र आभजप्र अपापशुभिः स ह पुनर्मा विशताद्रयिः ॥ मंत्रावृत्त्या कलशे तोनिधाय ॥ ॐ इमं मे गंगे यमुने
सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या ॥ असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥ तीर्थज
लेन पूरयित्वा ॥ ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं ॥ गंधं प्रक्षि
प्य ॥ चंदनपुष्पादिना भूषितो कृत्वा ॥ ॐ कांडात्कांडात्प्ररोहंती परुषः परुषः परि ॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन
च ॥ दूर्वा निधाय ॥ ॐ अश्वत्थे वो निषदनं पर्णे ॥ पंचपल्लवान् ॥ ॐ अग्ने रेतश्चंद्रं हिरण्यं मद्भ्यः संभूतममृतं
प्रजासु ॥ तत्संभरन्नुत्तरतो निधाय ॥ अतिप्रयच्छन् दुरितिं न देवं ॥ हिरण्यं निधाय ॥ हिरण्यरूपस हिरण्यसंदृगपां न
पात्सेदु हिरण्यवर्णः ॥ हिरण्ययात्परियोनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥ ॐ बृहस्पते जुषस्व नो हव्यानि विश्व
देव्य ॥ रास्व रत्नानि दाशुषे ॥ रत्नानि ॥ ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ॥ बृहस्पतिप्रसूता
स्तानो मुंचंत्वंहसः ॥ फलं ॥ युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ॥ तं धीरासः कवय उन्नयंति
स्वाध्यो मनसा देवयंतः ॥ वस्त्रं ॥ ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत ॥ वस्नेव विक्रीणावहा इषमूर्जं
शतक्रतो ॥ तंदुलफलसहितपात्राभ्यामाने निधाय ॥ सर्वत्र प्रतिकलशं मंत्रावृत्तिः कर्तव्या ॥ उत्तर

5

हि॰प्र॰
७

कलशे ॥ ॐ तत्वायामि शुनःशेपो वरुणस्त्रिष्टुप् ॥ वरुणावाहने विनियोगः ॥ ॐ तत्वायामि ब्रह्मणा वंदमा
नस्तदाशास्ते यजमानो हविर्भिः ॥ ॐ हेडमानो वरुणेह बोध्युरुशंस मान आयुः प्रमोषीः ॥ इति वरुणमा
वाह्य ॥ वरुणाय नमः इति गंधपुष्पधूपदीपनैवेद्यादिभिः संपूज्य दक्षिणां दत्वा ॥ देवता आवाहयेत् ॥ ॐ क
लशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः
सर्वे सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्रि
ताः ॥ अत्र गायत्री सावित्री शांतिः पुष्टिकरी तथा ॥ आयांतु मम शांत्यर्थं दुरितक्षयकारकाः ॥ सर्वे समु
द्राः सरितस्तीर्थानि जलदा नदाः ॥ आयांतु मम शांत्यर्थं दुरितक्षयकारकाः ॥ उत्तरकलशे अक्षतान् क्षिपेत् ॥ मा
तृदेवो भव ॥ पितृदेवो भव ॥ आचार्यदेवो भव ॥ अतिथिदेवो भव ॥ अवनिकृतजानुमंडलः कमलमुकुलसदृश
मंजलीं कृत्वा शिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णं कलशं धारयित्वा आशिषः प्रार्थयंते ॥ प्रार्थनामहा
एताः सत्या आशिषः संतु ॥ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च तेनायुःप्रमाणेन पुण्याहं दीर्घमायु
रस्तु ॥ शिवं हस्ते ॥ शिवा आपः संतु ॥ सौमनस्यमस्तु ॥ अक्षतं चारिष्टं चास्तु ॥ गंधाः पांतु सुमंगल्यं चास्तु ॥ अ सां॰वं॰
४

5A

सरितः पांतु आयुष्यमस्तु ॥ पुष्पाणि पांतु सौश्रियमस्तु ॥ तांबूलानि पांतु ॥ ऐश्वर्यमस्तु ॥ दक्षिणाः पांतु ॥ बहुदे-
यं चास्तु ॥ दीर्घमायुः शांतिः पुष्टिस्तुष्टिश्चास्तु ॥ श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु ॥ सर्वत्र आ-
ह्लणैरस्त्विति भवंतूत्तरं देयं ॥ यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्तंते ॥ तमहमोंकार-
मादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बहुऋषिमतं संविज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये ॥ वाच्यतामिति
विप्रा वदेयुः ॥ उत्तरत्र यथायोगं ॥ ॐ भद्रं कर्णेभिः शृणुयाम देवाः ॥ भद्रं पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवांस-
स्तनूभिः ॥ व्यशेम देवहितं यदायुः ॥ ॐ द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्रयंसत् ॥ द्रविणोदा वीर-
वतीमिषं नो द्रविणोदा रासते दीर्घमायुः ॥ ॐ सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ॥
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥ ॐ नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे ॥ भागं
देवेभ्यो विदधात्यायन्प्रचंद्रमास्तिरति दीर्घमायुः ॥ ॐ उच्चा दिवि दक्षिणावंतो अस्थुर्ये अश्वदाः सह ते सूर्येण ॥
हिरण्यदा अमृतत्वं भजंते वासोदाः सोम प्रतिरंत आयुः ॥ ॐ आपउंदंतु जीवसे दीर्घायुत्वाय वर्चसे ॥ ॐ यस्त्वा हृदा
कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि ॥ जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां ॥ यस्मै त्वं
सुकृते जातवेद उलोकमग्ने कृणवः स्योनं ॥ अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति ॥ ॐ संत्वा सिंचामि यजु-

Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

हि॰ गा॰
५

पागजामायुर्धनं च ॥ व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानां ब्राह्मणानां मनः समाधीयतां समाहित
मनसः स्मः ॥ प्रसीदंतु भवंतः ॥ वि॰ प्रसन्नाः स्मः ॥ शांतिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ वृद्धिरस्तु ॥ अविघ्नम
स्तु ॥ आयुष्यमस्तु ॥ आरोग्यमस्तु ॥ शिवं कर्मास्तु ॥ कर्मसमृद्धिरस्तु ॥ धर्मसमृद्धिरस्तु ॥ वेदसमृद्धिरस्तु ॥ शा
स्त्रसमृद्धिरस्तु ॥ पुत्रसमृद्धिरस्तु ॥ धनधान्यसमृद्धिरस्तु ॥ इष्टसंपदस्तु ॥ बहिर्देशे अपः ॥ अरिष्टनिरसनम
स्तु ॥ यत्पापं तत्प्रतिहतमस्तु ॥ अंतः ॥ यच्छ्रेयस्तदस्तु ॥ उत्तरे कर्मण्यविघ्नमस्तु ॥ उत्तरोत्तरमहरहरभिवृद्धिर
स्तु ॥ उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंतां ॥ तिथिकरणमुहूर्तनक्षत्रसंपदस्तु ॥ तिथिकरणमुहूर्तनक्षत्र
ग्रहलग्नाधिदेवताः प्रीयंतां ॥ तिथिकरणमुहूर्ते नक्षत्रे सग्रहे सदैवते प्रीयेतां ॥ दुर्गापांचाल्यौ प्रीयेतां ॥ अग्नि
पुरोगा विश्वेदेवाः प्रीयंतां ॥ इंद्रपुरोगा मरुद्गणाः प्रीयंतां ॥ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंतां ॥ माहेश्वरीपुरोगा
उमामातरः प्रीयंतां ॥ वसिष्ठपुरोगा ऋषिगणाः प्रीयंतां ॥ अरुंधतीपुरोगा एकपत्न्यः प्रीयंतां ॥ ऋषयश्छंदांस्या
चार्या वेदा यज्ञाश्च प्रीयंतां ॥ ब्रह्म च ब्राह्मणाश्च प्रीयंतां ॥ श्रीसरस्वत्यौ प्रीयेतां ॥ श्रद्धामेधे प्रीयेतां ॥ भगव
ती कात्यायनी प्रीयतां ॥ भगवती माहेश्वरी प्रीयतां ॥ भगवती पुष्टिकरी प्रीयतां ॥ भगवती तुष्टिकरी प्रीयतां ॥ भगव सं॰ पु॰
ती ऋद्धिकरी प्रीयतां ॥ भगवती वृद्धिकरी प्रीयतां ॥ भगवंतौ विघ्नविनायकौ प्रीयेतां ॥ भगवान् स्वामी महासेनः ५

सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्रीयतां॥ हरिर्हरहिरण्यगर्भाः प्रीयंतां॥ सर्वा ग्रामदेवताः प्री
यंतां॥ सर्वाः कुलदेवताः प्रीयंतां॥ सर्वा वास्तुदेवताः प्रीयंतां॥ बहिरपः॥ हता ब्रह्मद्विषः॥ हताः परिपंथिनः॥
हता अस्य कर्मणो विघ्नकर्तारः॥ शत्रवः पराभवं यांतु॥ शाम्यंतु घोराणि॥ शाम्यंतु पापानि॥ शाम्यंत्वीतयः॥ अ
तः॥ शुभानि वर्द्धंतां॥ शिवा आपः संतु॥ शिवा ऋतवः संतु॥ शिवा अग्नयः संतु॥ शिवा आहुतयः संतु॥ शिवा ओष
धयः संतु॥ शिवा वनस्पतयः संतु॥ शिवा अतिथयः संतु॥ अहोरात्रे शिवे स्यातां॥ निकामे निकामे नः पर्जन्यो वर्षतु
फलिन्यो न ओषधयः पच्यंतां योगक्षेमो नः कल्पतां॥ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहित
आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंतां॥ भगवान्नारायणः प्रीयतां॥ भगवान्पर्जन्यः प्रीयतां॥ भगवान्स्वामी महासेनः
प्रीयतां॥ पुण्याहकालान्वाचयिष्ये॥ वाच्यतां॥ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि॥ वृषेव वा
जी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने पुण्यमा वद॥ याज्यया यजति प्रतिवेर्यां ज्या पुण्येव
लक्ष्मीः पुण्यामेव तं लक्ष्मीं संभावयति पुण्यां लक्ष्मीं संस्तुतो ऽ रुते॥ यत्पुण्यं नक्षत्रं॥ तद्बट्कुर्वीतोपव्युषं॥ यदा वै सूर्य
उदेति॥ अथ नक्षत्रं नैति॥ यावति तत्र सूर्यो गच्छेत्॥ यत्र जघन्यं पश्येत्॥ तावति कुर्वीत यत्कारी स्यात्॥ पुण्याहस्य कु

४
हि॰प्र॰
८

कुर्वते॥ तानि वा एतानि यमनक्षत्राणि॥ यान्येव देवनक्षत्राणि॥ तेषु कुर्वीत यत्कारी स्यात्॥ पुण्याह एव कुरुते॥ मह्यं सहकु
टुंबिने महाजनान्नमस्कुर्वाणाया शीर्वचनमपेक्षमाणायामुककर्मकारिणे पुण्याहं भवंतो ब्रुवंतु॥ इति त्रिर्यजमान आ॥
ॐ पुण्याहमिति त्रिर्विप्राः॥ ॐ अत्र पुण्यास्कंदयः शब्दाः प्रदिशने सधमेंके वचनांता एव प्रयोक्तव्याः॥ तेषां स्वप्रस्ता
त्॥ ॐ स्वस्तये वायुमुपब्रवामहे सोमं स्वस्ति भुवनस्य यस्पतिः॥ बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो
भवंतु नः॥ आदित्यरुद्रपनीयः पथ्यमेवेतः स्वस्त्याप्रयोति पथ्यां स्वस्तिमभ्युधेति स्वस्त्येवेतः प्रयंति स्वस्त्युधेति स्वस्त्यु
धेति॥ ॐ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः॥ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधा
तु॥ ॐ अद्भी देवा वसवः सोम्यासः॥ चतस्रो देवीरजराः श्रविष्ठाः॥ ते यज्ञं पांतु रजसः परस्तात्॥ संवत्सरीणम
मृतं स्वस्ति॥ मस्यमिस्यादि॥ अमुककर्मकारिणे स्वस्ति भवंतो ब्रुवंतु॥ इति त्रिः यजमानः॥ ॐ स्वस्तिरिति प्रतिवच
नं त्रिः॥ ॐ ऋध्याम स्तोमं सनुयाम वाजमा नो मंत्रं सरथेहोप यातं॥ यशो न पक्वं मधु गोष्वंतरा भूतांशो अश्विनोः काम
प्राः॥ सर्वाम ऋद्धिमृध्नुयामिति लंबैतेजसेव पुरस्तात्संभवच्छंदोभिर्मृध्यलोके सदैरूपारिष्टाज्जायप्या सर्वतो द्वादशाहं परि
भूय सर्वाम ऋद्धिमाप्नोत्सर्वाम ऋद्धिमृध्नोति य एवं वेद॥ ॐ ऋध्याम स्म हव्यैर्नमसोपसद्य॥ मित्रं देवं मित्रधेयं नो अस्तु॥ सं॰पु॰
८

7A

अनूराधान्हविषा वर्धयंतः॥ शतं जीवेम शरदः सवीराः॥ त्रीणि त्रीणि वै देवानामृद्धानि॥ त्रीणि छंदांसि॥ त्रीणि स
वनानि॥ त्रय इमे लोकाः॥ ऋध्यामेव तद्वीर्य एषु लोकेषु प्रतितिष्ठति॥ मत्स्य मित्यादि॥ अमुक कर्म कारिणो ऋद्धिं भवंतो ब्रु
वंत्विति ऋध्यतां यजमानः॥ ॐ ऋद्धिरिति प्रतिवचनं त्रिः॥ ॐ श्रियै जातः श्रिय आनिर्याय श्रियं वयो जरितृभ्यो दधाति॥ श्रियं
वसाना अमृतत्वमायन् भवंति सत्या समिथा मितद्रौ॥ श्रिय एवैनं तच्छ्रियामादधाति संततमृचा वषट्कृत्यं संततं संधीय
ते प्रजया पशुभिर्य एवं वेद॥ यस्मिन्नाला भ्रजयत्समेनं तु॥ अमुं च लोकमिदमूच सर्वं॥ तन्नो नक्षत्रमभिजिद्विजित्य॥
श्रियं दधात्वहृणीयमानं॥ अहे बुध्निय मंत्रं मे गोपाय॥ यमृषयस्त्रैविदा विदुः॥ ऋचः सामानि यजूंषि॥ सा हि
श्रीरमृता सतां॥ एभिर्मंत्रैः सुवासिनीभिर्नीराजनं कारयेत्॥ मत्स्य मित्यादि॥ अमुक कर्म कारिणे श्रीरस्त्विति भवंतो ब्रु
वंत्विति श्रीर्यजमानः॥ ॐ अस्तु श्रीरिति प्रतिवचनं त्रिः॥ वृषभं तं पूर्णमस्तु॥ शिवं कर्मास्तु॥ गोत्राभिवृद्धिरस्तु॥ प्रजाप
तिः श्रिया प्रीयतां॥ कर्मांतरे पुण्याहवाचने मध्ये ऋद्धिदेवता ग्राह्याः॥ ॐ शुक्रेभिरंगैरज आततन्वान् क्रतुं पुनानः कवि
भिः पवित्रैः॥ शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः॥ तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरु
त्तस्यावसन् गृहे॥ आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति॥ ततउत्तरकलशं दक्षिणहस्ते दक्षिणं कलशमु
त्तरहस्ते गृहीत्वा ताभ्यां धारा द्वयं संततं पात्रे निषिंचेदेभिर्मंत्रैः॥ ॐ वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो

8

हि॰प॰

भवा नः ॥ यत्सोम रुग्ननितिलन्नो जुषस्व शंन एधि द्विपदे शं चतुष्पदे ॥ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिर
श्वेभिरिंदो ॥ अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥ वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्व
या गातुमत्या ॥ आवः क्षेम उत योगे वरन्नो यूयं पात स्वस्तिभिः सदा नः ॥ अमीवहा वास्तोष्पते विश्वा रूपाण्यावि
शन् ॥ सखा सुशेव एधि नः ॥ शिवं शिवं शिवं ॥ ततः कर्त्ता कलशस्थं यथास्थानं उदकमवर्णं निधाय पल्लवाभ
लतुपवेशयेत् ॥ विप्रा उदङ्मुखाः पल्लवदूर्वादिग्रहीत्वा पात्रस्थाप्याराजलेनाभिषिंचेयुर्वक्ष्यमाणमंत्रैः ॥ ॐ समु
द्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यंत्यनिविशमानाः ॥ इंद्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवंतु ॥ या
आपो दिव्या उत वा स्रवंति खनित्रिमा उत वा याः स्वयंजाः ॥ समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मा
मवंतु ॥ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानां ॥ मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरि
ह मामवंतु ॥ यासु राजा वरुणो यासु सोमो विश्वेदेवा यासूर्जं मदंति ॥ वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरि
ह मामवंतु ॥ त्वाममंतामिह देवा स्त्राय तेन मरुतां गणाः ॥ आप्यंतां विश्वा भूतानि यथा ममरपा असन् ॥ आप इद्वा उ भेष
जीरापो अमीवचातनीः ॥ आपः सर्वस्य भेषजीस्ता स्ते कृण्वंतु भेषजं ॥ हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरो
गवी ॥ अनामयित्नुभ्यां त्वा ताभ्यां त्वोपस्पृशामसि ॥ इमा आपः शिवतमा इमाः सर्वस्य भेषजीः ॥ इमा राष्ट्रस्य वर्धनी

... Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan ... Mumbai

8A

ह्मा राष्ट्रभृतोमृतास्तः॥ याभिरिंद्रमभ्यषिंचत्प्रजापतिः सोमं राजानं वरुणं यमं मनुं॥ ताभिरद्भिरभिषिंचामि त्वामहं रा
ज्ञां त्वमधिराजो भवेह॥ महांतं त्वा महीनां सम्राजं चर्षणीनां देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्॥ देवस्य त्वा
सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेंद्रस्येंद्रियेणाभिषिंचामि॥ बलाय श्रियै यशसे
न्नाद्याय॥ देवस्य त्वा सवितुः प्रसवे॥ अश्विनोर्बाहुभ्यां॥ पूष्णो हस्ताभ्यां॥ अश्विनोर्भैषज्येन॥ तेजसे ब्रह्मवर्चसायाभिषिं
चामि॥ देवस्य त्वा सवितुः प्रसवे॥ अश्विनोर्बाहुभ्यां॥ पूष्णो हस्ताभ्यां॥ सरस्वत्यै भैषज्येन॥ वीर्यायान्नाद्यायाभिषिंचामि॥
देवस्य त्वा सवितुः प्रसवे॥ अश्विनोर्बाहुभ्यां॥ पूष्णो हस्ताभ्यां॥ इंद्रस्येंद्रियेण॥ श्रियै यशसे बलायाभिषिंचामि॥ देवस्य
त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां सरस्वत्यै वाचो यंतुर्यंत्रेणाग्नेस्त्वा साम्राज्येनाभिषिंचामींद्रस्य बृह
स्पतेस्त्वा साम्राज्येनाभिषिंचामि॥ बलाय श्रियै यशसेन्नाद्याय॥ ॐ भूर्भुवः सुवः॥ अमृताभिषेकोस्तु॥ शांतिः पुष्टिस्तुष्टि
श्चास्तु॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः॥ वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः॥ प्रद्युम्नश्चानिरुद्धश्च भवं
तु विजयाय ते॥ आखंडलोग्निर्भगवान्यमो वै निरृतिस्तथा॥ २॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः॥ ब्रह्मणा सहि
ताः सर्वे दिक्पालाः पांतु ते सदा॥ ३॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥ बुद्धिर्लज्जा वपुः शांतिः कांतिः तु
ष्टिश्च मातरः॥ ४॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः॥ आदित्यश्चंद्रमा भौमो बुधजीवः सितोर्कजः॥ ५॥ ग्रहास्त्वा

९

ग्र॰ प्र॰ ६

मभिषिंचंतु राहुः केतुश्च पूजिताः ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ऋषयो मुनयो गावो देवमातर एव च ॥ देवपत्न्यो द्रुमा
नागा दैत्याश्चाप्सरसां गणाः ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ औषधानि च रत्नानि कालस्यावयवाश्च ये ॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥ एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये ॥ ॐ भूर्भुवः सुवः ॥ अमृताभिषेको
स्तु ॥ शांतिः पुष्टिस्तुष्टिश्चास्तु ॥ तत आचार्यास्तं वस्त्रादिदानेन संतोष्य नंदकुर्यात् ॥ तत्र मंत्रः ॥ ॐ युवा सुवासाः परिवी
त आगात् ॥ स उ श्रेयान्भवति जायमानः ॥ तं धीरासः कवय उन्नयंति ॥ स्वाध्यो मनसा देवयंतः ॥ इति पुण्याहवाचनप्रयो
गः ॥ अथ मातृकापूजा ॥ गौरी पद्मा शची मेधा सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः
पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही च तथेंद्राणी चामुंडाः सप्तमातरः ॥
एता गणपतिसहिताश्चतुर्विंशत्संख्याः पूज्याः ॥ तदस्तु मित्रावरुणा तदग्ने शंयोरस्मभ्यमिदमस्तु शस्तं ॥
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥ [illegible] प्रतिष्ठा स्थलं तत्रावलिखितं तत्र मया वा त्वा शंस्तव्यं
मस्माद्यपि दूर इव पश्यन्त्युभ भते गृहाणे वैना नाजि गभिषपति गृहाद्विपश्यंतां प्रतिष्ठा प्रतिष्ठा ॥ ॐ नयिक्षोमे
गोपाय ॥ अमृतत्वाय जीवसे ॥ जातां जनिष्यमाणां च ॥ अमृते सत्ये प्रतिष्ठितां ॥ इति प्रतिष्ठाप्य ॥ नाममंत्रैः षो
डशोपचारैः पंचोपचारैर्वा संपूज्य ॥ ॐ गौरीर्मिमाय सलिलानि तक्षती ॥ एकपदी द्विपदी सा चतुष्पदी ॥ अष्टा

सां॰ पू॰ ८

पदी नवपदी बभूवुषी॥ सहस्राक्षरा परमे व्योमन्॥ इति पुष्पांजलिं दत्वा॥ उत्तिष्ठ ब्रह्मणस्पते॥ देवयंतस्त्वेमहे॥ उ
प प्र यंतु मरुतः सुदानवः॥ इंद्र प्राशूर्भवा सचा॥ यांतु देवगणाः सर्वे पूजामादाय पार्थिवीं॥ इष्टकामप्रसिध्यर्थं पुन
रागमनाय च॥ ॐ अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु॥ आवाहनस्य विसर्जने॥ इति विसर्जयेत्॥ अथ नांदीश्राद्धं॥
सदूर्वांकुरानक्षतानादाय॥ सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः भूर्भुवः सुवः इदं वः पाद्यं स्वाहा न मम इयं
वृद्धिः॥ मातृपितामही प्रपितामह्यः नांदीमुख्यः भूर्भुवः सुवः इदं वः पाद्यं स्वाहा न मम इयं वृद्धिः॥ पितृपितामहप्र
पितामहाः नांदीमुखाः भूर्भुवः सुवः इदं वः पाद्यं स्वाहा न मम इयं वृद्धिः॥ मातामह मातुः पितामह मातुः प्रपितामहाः प
त्नीसहिताः नांदीमुखाः भूर्भुवः सुवः इदं वः पाद्यं स्वाहा न मम इयं वृद्धिः॥ सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः भू
र्भुवः सुवः इदं वः आसनगंधाद्युपचारकल्पनं स्वाहा न मम इयं वृद्धिः॥ मातृपितामही प्रपितामह्यः नांदीमुख्यः भूर्भु
वः सुवः इदं वः आसनगंधाद्युपचारकल्पनं स्वाहा न मम इयं वृद्धिः॥ पितृपितामहप्रपितामहाः नांदीमुखाः भूर्भु
वः सुवः सुवः इदं वः आसनगंधाद्युपचारकल्पनं स्वाहा न मम इयं वृद्धिः॥ मातामह मातुः पितामह मातुः प्रपिताम
हाः पत्नीसहिताः नांदीमुखाः भूर्भुवः सुवः इदं वः आसनगंधाद्युपचारकल्पनं स्वाहा न मम इयं वृद्धिः॥ गौर्या
दि षोडश मातरः॥ ब्राह्म्यादि सप्त मातरः गणपति सहिता इदं वो दास्यमानं युग्मब्राह्मणभोजनपर्याप्तमन्नं हि

म·प्र· रण्यं वा यथाशक्ति स्वाहा न मम इयं च वृद्धिः॥ सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः भूर्भुवः सुवः इदं वो दास्य-
९ मानं युग्मब्राह्मणभोजनपर्याप्तमन्नं हिरण्यं वा यथाश क्ति स्वाहा न मम इयं च वृद्धिः॥ मातृपितामहीप्र-
पितामह्यः नांदीमुख्यः भूर्भुवः सुवः इदं वो दास्यमान युग्मब्राह्मणभोजनपर्याप्तमन्नं हिरण्यं वा यथाशक्ति
स्वाहा न मम इयं च वृद्धिः॥ पितृपितामहप्रपितामहाः नांदीमुखाः भूर्भुवः सुवः इदं वो दास्यमानं युग्मब्राह्मणभो-
जनपर्याप्तमन्नं हिरण्यं वा यथाशक्ति स्वाहा न मम इयं च वृद्धिः॥ मातामह मातुः पितामह मातुः प्रपितामहाः पत्नी-
सहिता नांदीमुखाः भूर्भुवः सुवः इदं वो दास्यमानं युग्मब्राह्मणभोजनपर्याप्तमन्नं हिरण्यं वा यथाशक्ति स्वाहा न
मम इयं च वृद्धिः॥ ततः॥ ॐ उपास्मै गायता नरः पवमानायेंदवे॥ अभि देवां इयक्षते॥ अभि ते मधुना पयोऽथर्वाणो अ-
शिश्रयुः॥ देवं देवाय देवयु॥ स नः पवस्व शं गवे शं जनाय शमर्वते॥ शं राजन्नोषधीभ्यः॥ बभ्रवे नु स्वतवसेऽरु-
णाय दिविस्पृशे॥ सोमाय गाथमर्चत॥ हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन॥ मधावाधावता मधु॥ कृतस्य नां-
दीश्राद्धस्य प्रतिष्ठाफलसिध्यर्थं द्राक्षामलकानि तन्निष्क्रयभूतं यथाशक्ति हिरण्यं वा दक्षिणात्वेन स्वाहा न म-
म इयं च वृद्धिः॥ ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव॥ यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्या- सां·वृ·
म पतयो रयीणां॥ कृतेन नांदीश्राद्धेन नांदीमुखदेवताः प्रीयंतां वृद्धिः॥ माता पितामही चैव तथैव प्रपितामह ९

हि॥ पितापितामहश्चैव तथैव प्रपितामहः॥ मातामहस्तस्सिता च प्रमातामहकादयः॥ एते भवंतु मे प्रीताः प्रयच्छंतु
च मंगलं॥ इति संप्रार्थ्य॥ ॐ इडामग्ने पुरुदंससं सनिं गोः शश्वत्तमं हवमानाय साध॥ स्यान्नः सूनुस्तनयो विजा-
वाग्ने सा ते सुमतिर्भूत्वस्मे॥ नाणकमादाय पात्रे स्थापयेत्॥ ततोग्निप्रतिष्ठादिविवाहादौ रजोदर्शने सति शांतिसमक-
रणोक्तरीत्या शांतिकं कार्यं॥ ततो गर्भाधानकर्मणः सांगतासिध्यर्थं दशाधिकान्ब्राह्मणान् यथाकालं यथोप-
पन्नेनान्नेन भोजयिष्य इति संकल्प्य यथाकालं भोजयेत्॥ ततः कृतस्य गर्भाधानकर्मणः सांगतासिध्यर्थं नाना-
नामगोत्रब्राह्मणपूजनं तेभ्यो गंधतांबूलादिदानं भूयसीदक्षिणादानं च करिष्ये॥ इति संकल्प्य कुर्यात्॥ त-
तः प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः॥ इति कर्मसाद्गुण्याय वि-
ष्णुं स्मृत्वा शिष्टैः सह भोजनं कुर्यात्॥ ततः कर्ता [illegible] रूमायश्य कस्त्रिय॥ आचम्य स्वलंकृतां स्वच्छवस्त्रसन-
परिधानां भार्यां सम्यगास्तृते पर्यंके शायनार्थमुप[illegible]भिर्मंत्रैः॥ ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंश-
तु॥ आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते॥ ॐ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति॥ गर्भं ते अश्विनावुभावा-
धत्तां पुष्करस्रजौ॥ २॥ ॐ हिरण्ययी अरणी यं निर्मंथतो अश्विना॥ तं ते गर्भं हवामहे दशमे मासि सूतवे॥ ३॥ ॐ
यथाग्निगर्भा पृथिवी द्यौर्यथेंद्रेण गर्भिणी॥ वायुर्यथा दिशां गर्भ एवं गर्भं दधामि ते॥ ४॥ ॐ यस्य योनिं प्रतिरेतो ग-

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com